IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# गुरोर्ज्ञानप्रसारणेनैव अज्ञानापसरणम्

[1]Srilakshmi
[1]phd
[1]srilakshmi

**शोधसङ्क्षिप्तिका** – अस्मिन् प्रबन्धे

1. अविद्यायाः पर्यायपदानि
2. अविद्यायाः विषयः, आश्रयः च
3. अविद्यायाः दुर्दशा
4. गुरुवन्दनम्, अज्ञानहरणम्
5. गुरूपदेशेन आत्मज्ञानम्
6. उपसंहारः

इत्यादि विषयाः प्रतिपाद्यन्ते।

**1.उपोद्घातः** –

वेदान्ते अविद्याया अस्ति महत् स्थानम्। अविद्याया एव परिणाम्युपादानं स्वीकुर्वन्ति अद्वैतिनः। अविद्या विषये महती विचारधारां अकुर्वन् अद्वैतवादिनः। तादृश्याः अविद्यायाः अपसरणार्थं गुरुरेव आवश्यकः। तेषां कृपाकटाक्षाद्युपदेशेन अस्माकं दुःखराहित्यं भवतीति निस्संन्देहः।

**2.अविद्यायाः पर्यायपदानि**

अस्याः अविद्यायाः पर्यायपदानि अभिहितानि सन्ति पञ्चपादिकायां एवम् इयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपम्, अव्याकृतम्, अविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशम् इति च तत्र तत्र बहुधा गीयते।[1] एतेषु नामसु पूर्वं पञ्चपादिकायामनुक्तानि नामानि जाड्यम् मौढ्यम् तिमिरम् तमिस्त्रम् तामिस्रम् अन्धतमः तामस्रा आन्ध्यम् अनृतम् गुणैक्यम् इति दश भवन्ति। एतेषां नाम्नां विवरणमन्वयार्थप्रकाशिकायां दिङ्मात्रेण एवं प्रदर्शितम्। सा प्रकृतिरेव ज्ञानपर्युदासेन अज्ञानमिति अज्ञानमिति

[1]पञ्चपादिका सूत्रम् – १, वर्णकम्-१, पृष्ठम् १७३-१७४

ज्ञानविरोधित्वेन जाड्यमिति च अस्वच्छतया मौढ्यमिति च प्रसिद्धा इति। तिमिरादिशब्दाः हि निष्प्रतियोगिकमर्थमावेदयन्ति, अतः अज्ञानमिति शब्दः ज्ञानपर्युदासेन उच्यमानः अपि अधर्मशब्दवत् न अभावविषयः इति भावः[2] इति च।

### 3.अविद्यायाः विषयः

अस्याः विषयः कः इति विषये सङ्क्षेपशारीरकोक्तं चैतन्यस्य केवलस्य। भामतीकारोक्तम् ईश्वररूपचैतन्यस्य विषयत्वमिति पक्षद्वयं दर्शितप्रायं भवति। तत्र आचार्यैः वार्तिके एकः विशेषः अभिहितः यथा –

***अहमेव परंब्रह्म इत्यर्थस्य अप्रबुद्धता।***

***अविद्येति वयं ब्रूमः येह नास्ति सदात्मनि॥[3] इति***

अत्र च अविद्या नाम जीवब्रह्मणोः ऐक्यज्ञानमिति प्रतिपादयन्ति। अतः जीवब्रह्मणोः अभेदः ऐक्यं वा भवति अज्ञानस्य विषयः इत्यपि। चैतन्यस्यैव अज्ञानविषयत्वम्।

**अविद्यायाः आश्रयः**

अस्य अज्ञानस्य आश्रयः कश्चन वक्तव्यः। निराश्रयस्य अस्यप्रतीति सिध्ययोगात्। प्रतीतिः हि अहमज्ञः इत्याकारा

अविद्यां किञ्चिदाश्रितामेव गमयति। स च आश्रयः कः इति विचारे केचित् अन्तःकरणमेव अविद्यायाः आश्रयः इति जल्पन्ति। अहमिति प्रतीतौ तावत् अन्तःकरणमवभासते। अतः तस्मिन् आश्रितमज्ञानमिति अहमज्ञः इति प्रतीत्या एव सिध्यति इति उपपादयन्ति च।

जीवः नाम शुद्धस्य चैतन्यस्य अविद्यया कल्पितं किञ्चित् रूपम्। अन्यरूपत्वे बन्धमोक्षयोः सामानाधिकरण्यानुपपत्तेः। ततश्च अन्योन्याश्रयः अविद्यायां सिद्धायां तत्कल्पितः जीवः सिध्यति।

जीवे आश्रये सिद्धे तदाश्रिता अविद्या सिध्यति इति।

न चैवमन्योन्याश्रितः जीवविभागाश्रया अविद्या अविद्याश्रयश्च जीवविभागः इति। बीजाङ्कुरवत् अनादित्वात् खलु आदिमान् संसारः नापि आदिमती अविद्या जीवविभागः येन अनुयुज्येत।[4]

अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः[5] इति स्पष्टं मायाख्यायाः अविद्यायाः परमेश्वराश्रितत्वोक्तेः श्रृतिर्हि – मायान्तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्[6] इति। केचित्तु आचार्याः अस्याः श्रृतेः उपपादनाय मायायाः अविद्यायाः च भेदं कल्पयित्वा मायायाः आश्रयः ईश्वरः। अतः मायी इति तत्र शब्दप्रयोगः। अविद्यायाः च आश्रयः जीवः अतः तत्र अज्ञः इति शब्दप्रयोगः।

---

2. अन्वयार्थप्रकाशिका पृष्ठम् – २४६,२४८

3.बृहदारण्यकोपनिषत् भाष्यवार्तिकम्, श्लोकः ११५७

4.भामती १-४-२३, पृष्ठम्-४२१

5.ब्रह्मसूत्रभाष्यम् १-४-३, पृष्ठम्-३७८

6श्वेताश्वतरोपनिषत् २-२०

**4.अविद्यायाः दुर्दशा**

***अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।***

***द्रन्द्रम्यमाणाः पश्यन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥ ५*[7]**

अविद्यायामन्तरे मध्ये घनीभूत इव तमसि वर्तमाना वेष्ट्यमानाःपुत्रपश्वादितृष्णापाशशतैः। स्वयं वयं धीराः प्रज्ञावन्तः पण्डिताः शास्त्रकुशलाश्चेति मन्यमानास्ते द्रन्द्रम्यमाणा अत्यर्थं कुटिलामनेकरूपां गतिम् इच्छन्तो जरामरणरोगादिदुःखैः परिगच्छन्ति मूढा अविवेकिनोऽन्धेनैव दृष्टिविहीनेनैव नीयमाना विषमे पथि यथा बहवोऽन्धा महान्तमनर्थमृच्छन्ति तद्वत्। पुत्रपश्वादिप्रयोजनेष्वासक्तमनसं तथा वित्तमोहेन मूढं तमसाच्छन्नं सन्तम् जननमरणादि लक्षण दुःखप्रबन्धारूढ एव पुरुषः भवति।

***महाहंकारगर्वेण तपोविद्या बलेन च।***

***भ्रमन्ति चास्मिन् संसारे घटीयन्त्रं यथा पुनः॥*[8]**

एतादृशीं दुर्दशां अप्राप्तुं आत्मज्ञानमावश्यकम्। आत्मज्ञानं गुरोरनुग्रहेण एव लभ्यते। अस्मिन् प्रबन्धे तस्य गुरूपदेशेनैव स्वशिष्याय आत्ममार्गं उपदिष्टवन्तः।काश्चन दृष्टान्तान् प्रस्तौमि।

**5.गुरुवन्दनम् अज्ञानहरणम्**

***ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं***

***द्वन्दातीतं गगनसदृशं तत्वमस्यादि लक्ष्यम्।***

***एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं***

***भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥***

***अज्ञानमूलहरणं जन्मकर्मनिवारकम्।***

***ज्ञानवैराग्यसिद्ध्यर्थं गुरोः पादोदकं पिबेत्॥*[9]**

***आत्मज्ञानार्थं एतादृशः सद्गुरुः आवश्यकः।***

लोके बहवः सन्ति शिष्यवित्तापहारकाः। तमेकं दुर्लभं शिष्यहृत्तापहारकं मन्ये। आत्मज्ञानाय गुरुं अन्विष्य अन्विष्य श्रोत्रियब्रह्मनिष्ठं प्राप्नुयात्। स्वात्मदर्शिनः, निर्मलाः, शान्ताः, साधवः, मितभाषिणः, कामक्रोधविनिर्मुक्ताः, सदाचाराः, जितेन्द्रियाः, सर्वसन्देहनिर्मूलनविचक्षणाः जन्ममृत्युभयघ्नाः तादृशाः आचार्याः अङ्गीकर्तव्याः।

***श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मविदुत्तमः।***

***ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः॥*[10]**

---

[7]कठोपनिषत् द्वितीयवल्ली ५ मन्त्रः

[8]गुरुगीता पृ.सं ९६ श्लो.सं १०६

[9]गुरुगीता पृं.सं १८(श्लो.सं ३१)

**6.गुरूपदेशेनैव आत्मज्ञानम् (केचन दृष्टान्ताः)**

विद्याविद्ययोः अन्तरं ज्ञात्वा नचिकेताः ज्ञानमार्गं ज्ञातुमेव उद्युक्तवान्। तं अभिनन्द्य गुरः यमः एवं अवोचत्।

***अणोरणीयान् महतोमहीयानात्माऽस्य जन्तोर्निहितोगुहायाम्।***

***तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः॥***[11]

अणुषु अल्पः महत्तरेषु महान् भवति आत्मा। एवं सति यः दुःखरहितः, इन्द्रियनिग्रहवान् प्रसादमनाः सः एव आत्मवैभवं प्राप्तुं प्रभवति। अतः इन्द्रियाणि मनः प्रशान्तानि न सन्ति चेत् आत्मसाक्षात्कारः न भवति इति उपदिष्टवान्।

अस्मिन् प्रसंगे गुरुः याज्ञवल्क्यः शिष्यां प्रियां भार्यां प्रति आत्मबोधं एवम् अकरोत्।

न वा अरे जायायाःकामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भव, त्यात्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे पशूनां कामाय पशवः प्रिया भव, न्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति। न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भव, त्यात्मनस्तु कामाय ब्रह्म प्रियं भवति ...................... न वा अरे सर्वस्य कामाय सर्वं प्रियं भव, त्यात्मनस्तु कामाय सर्वं प्रियं भवति ***आत्मा वा अरे द्रष्टव्यो श्रोतव्यो निधिध्यासितव्यो मैत्रे।*** त्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञानइदं सर्वं विदितम्।[12]

अस्मिन् दृष्टान्तेऽपि नारदः गुरुः सनत्कुमारं एवं अपृच्छत्। आर्य! अहं मन्त्रविद् न आत्मज्ञानी। यः आत्मज्ञानी सः दुःखातीतः इति मया श्रृतम्। अहं दुःखे अस्मि। अतः भवन्तः मां तारयन्तु इति प्रपद्ये। एवं समागतं नारदं सनत्कुमारः बहून् अंशान् ज्ञापयित्वा अन्ते आत्मोपदेशं एवम् अकरोत्।

अथात आत्मादेश एवात्मैवाथस्तदात्मोपरिष्टादात्मा पश्चादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्म क्रीडात्म मिथुन आत्मानन्द रस स्वराढ्भवति तस्य सर्वेषु लोकेषु कामाचारो भवति। अथयेऽन्यधातो विदुरूयराजानस्तेरक्षय्य लोका भवन्ति तेषां सर्वेषु लोकेष्वकामचारो भवति।[13]

**6.उपसंहारः**

पुरुषः अज्ञानेनावृतः अतः जीवस्य अज्ञानापसरणार्थं, आत्मोन्नत्यर्थं सद्गुरोः आश्रयं विना अन्यः मार्गः नास्ति। पितरः केवलं जन्महेतवः। आचार्याः ज्ञानजन्महेतवः भवन्ति। गहनस्य अत्यंतविस्तृतस्य आध्यात्मिक ज्ञानस्य दाता गुरुः एव भवन्ति। अज्ञानेन आवृतः जीवः केवलात्मज्ञानेनैव मुक्तिं प्राप्नोति। ***प्रज्ञानं ब्रह्म, तत्वमसि, अहं ब्रह्मास्मि*** इत्यादीनां महावाक्यानामर्थं स्वयं प्राप्य तत्वदर्शनज्ञाता सद्गुरुः एव भवति। दिव्यजीवनप्रकाशार्थं शिष्यः तादृशंगुरुं आश्रयेत् चेत् अवश्यं गुरुः तं उद्धरेत् इत्यत्र नास्ति सन्देहः।

एवं ऐतरेयोपनिषदि –

---

[10]विवेकचूडामणिः ३४

[11]कठोपनिषत् १ अध्यायः द्वितीयवल्ली(मं.२०)

[12]बृहदारण्यकोपनिषत् ५ भागः ६ मन्त्रः

[13]छान्दोग्योपनिषत् ७ अध्यायः २५ खण्डः मं.२

सजातः शरीरे प्रविष्टो जीवात्मना भूतानि अभिव्यैख्यत् व्याकरोत्। सः कदाचित् परमकारुणिकेन आचार्येण आत्मज्ञानप्रबोधकृच्छब्दिकायां वेदांतमहाभेर्यां तत्कर्णमूले ताड्यमानायां ऐतमेव सृष्ट्यादि कर्तुत्वेन प्रकृतं पुरुषं पुरिशयानं आत्मानं ब्रह्मबृहत्ततमन्तकारेण एकेन लुप्तेन तततमं व्याप्ततमं परिपूर्णमाकाशवत् प्रत्यबुध्यत अपश्यत्।[14]

**आधारग्रन्थाः**


1.पञ्चपादिका महेश अनुसंन्धान संस्थान् - वारणासी

2.अन्वयार्थप्रकाशिका

3.बृहदारण्यकोपनिषत् भाष्यवार्तिकम् – सुरेश्वरकृतम्

4.भामती – श्री सुब्रह्मण्यशास्त्रिमहेश अनुसंन्धानसंस्थान् – वारणासी

5.ब्रह्मसूत्रभाष्यम् – अनन्तकृष्णशास्त्री कैलास विद्याप्रतिष्ठान् २०००

6.ईशादिदशोपनिषद्भाष्यम् मोतीलाल् बनारस् दास्

7.कठोपनिषत् - ईशादिदशोपनिषद्भाष्यम् मोतीलाल् बनारस् दास्

8.गुरुगीता – श्री निर्विशेषानन्दः व्यासाश्रमः २०१३


[14]ऐतरीयोपनिषत् प्रधमाध्याये तृतीयखण्ड.म.१३